श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७५

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७५

*कंसवधवर्णनम्*

प्रातः सन्त्रस्तभोजक्षितिपतिवचसा प्रस्तुते मल्लतूर्ये
    सङ्घे राज्ञां च मञ्चानभिययुषि गते नन्दगोपेऽपि हर्म्यम्।
कंसे सौधाधिरूढे त्वमपि सहबलः सानुगश्चारुवेषो
    रङ्गद्वारं गतोऽभूः कुपितकुवलयापीडनागावलीढम्॥ १ ॥

पापिष्ठापेहि मार्गाद् द्रुतमिति वचसा निष्ठुरक्रुद्धबुद्धे-
    रम्बष्ठस्य प्रणोदादधिकजवजुषा हस्तिना गृह्यमाणः।
केळीमुक्तोऽथ गोपीकुचकलशचिरस्पर्धिनं कुम्भमस्य
    व्याहत्यालीयथास्त्वं चरणभुवि पुनर्निर्गतो वल्गुहासी॥ २ ॥

हस्तप्राप्योऽप्यगम्यो झटिति मुनिजनस्येव धावन् गजेन्द्रं
    क्रीडन्नापात्य भूमौ पुनरभिपतस्तस्य दन्तं सजीवम्।
मूलादुन्मूल्य तन्मूलगमहितमहामौक्तिकान्यात्ममित्रे
    प्रादास्त्वं हारमेभिर्ललितविरचितं राधिकायै दिशेति॥ ३ ॥

गृह्णानं दन्तमंसे युतमथ हलिना रङ्गमङ्गाविशन्तं
    त्वां मङ्गल्याङ्गभङ्गीरभसहृतमनोलोचना वीक्ष्य लोकाः।
हंहो धन्यो नु नन्दो नहि नहि पशुपालाङ्गना नो यशोदा
    नो नो धन्येक्षणाः स्मस्त्रिजगति वयमेवेति सर्वे शशंसुः॥ ४ ॥

पूर्णं ब्रह्मैव साक्षान्निरवधि परमानन्दसान्द्रप्रकाशं
    गोपेषु त्वं व्यलासीर्न खलु बहुजनैस्तावदावेदितोऽभूः।
दृष्ट्वाऽथ त्वां तदेदंप्रथममुपगते पुण्यकाले जनौघाः
    पूर्णानन्दा विपापाः सरसमभिजगुस्त्वत्कृतानि स्मृतानि॥ ५ ॥

चाणूरो मल्लवीरस्तदनु नृपगिरा मुष्टिको मुष्टिशाली
    त्वां रामञ्चाभिपेदे झटझटिति मिथो मुष्टिपातातिरूक्षम्।
उत्यातापातनाकर्षणविविधरणान्यासतां तत्र चित्रं
    मृत्योः प्रागेव मल्लप्रभुरगमदयं भूरिशो बन्धमोक्षान्॥ ६ ॥

हा धिक् कष्टं कुमारौ सुललिततवपुषौ मल्लवीरौ कठोरौ
    न द्रक्ष्यामो व्रजामस्त्वरितमिति जने भाषमाणे तदानीम्।
चाणूरं तं करोद्भ्रामणविगळदसुं पोथयामासिथोर्व्यां
    पिष्टोऽभून्मुष्टिकोऽपि द्रुतमथ हलिना नष्टशिष्टैर्दधावे॥ ७ ॥

कंसः संवार्य तूर्यं खलमतिरविदन् कार्यमार्यान् पितॄंस्ता-
    नाहन्तुं व्याप्तमूर्तेस्तव च समशिषद्दूरमुत्सारणाय।
रुष्टो दुष्टोक्तिभिस्त्वं गरुड इव गिरिं मञ्चमञ्चन्नुदञ्चत्-
    खड्गव्यावल्गदुस्सङ्ग्रहमपि च हठात् प्राग्रहीरौग्रसेनिम्॥ ८ ॥

सद्यो निष्पिष्टसन्धिं भुवि नरपतिमापात्य तस्योपरिष्टा-
    त्त्वय्यापात्ये तदैव त्वदुपरि पतिता नाकिनां पुष्पवृष्टिः।
किं किं ब्रूमस्तदानीं सततमपि भिया त्वद्गतात्मा स भेजे
    सायुज्यं त्वद्वधोत्थ परम परमियं वासना कालनेमेः॥ ९ ॥

तद्भ्रातॄनष्ट पिष्ट्वा द्रुतमथ पितरौ सन्नमन्नुग्रसेनं
    कृत्वा राजानमुच्चैर्यदुकुलमखिलं मोदयन् कामदानैः।
भक्तानामुत्तमं चोद्धवममरगुरोराप्तनीतिं सखायं
    लब्ध्वा तुष्टो नगर्यां पवनपुरपते रुन्धि मे सर्वरोगान्॥ १० ॥

**********